International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(1): 39-41
© 2017 IJSR
www.anantaajournal.com
Received: 13-11-2016
Accepted: 14-12-2016

**डा. सुशान्तकुमारराज**
सहाचार्यः, साहित्यविभागः राष्ट्रिय-संस्कृत-संस्थानम् (मा.वि) श्रीसदाशिवपरिसरः, पुरी, ओडिशा

**Correspondence**
**डा. सुशान्तकुमारराज**
सहाचार्यः, साहित्यविभागः राष्ट्रिय-संस्कृत-संस्थानम् (मा.वि) श्रीसदाशिवपरिसरः, पुरी, ओडिशा

# पण्डितराजजगन्नाथकृतकाव्यस्वरूपसमीक्षा

**डा. सुशान्तकुमारराज**

## प्रस्तावना

काव्यस्वरूपविचारप्रसङ्गे काव्यशास्त्रीयालङ्कारिकेषु विद्यते मतपार्थक्यमिति विदितचरमेव। तत्र विशेष्यतावच्छेदकतया केचन शब्दार्थयुगलं काव्यत्वेनाङ्गीकुर्वन्ति, पुनश्च केचन केवलं शब्दमेव काव्यलक्षणाधायकत्वेनाङ्गीकुर्वन्ति । एवञ्च केसाञ्चिदाचार्याणां मते रसगुणालङ्काराः काव्यलक्षणघटकतया विनिवेशनियाः सन्ति । अन्ये चैतन्मतं नाङ्गीकुर्वन्तीति कृत्वाऽस्मिन् प्रसङ्गे आचार्येषु महान् मतपार्थक्यं वरीवर्तते। अतः परवर्तिनः आलङ्कारिकाः पुर्ववर्तिनामालङ्कारिकाचार्याणां मतानि खण्डयन्ति स्वमतञ्चोपस्थापयन्तीति समवलोक्यते । काव्यशास्त्रीयविशिष्टालङ्कारिकाचार्येषु रसगङ्गाधरकारः पण्डितराजजगन्नाथः प्रामाणिकाचार्यरूपेण अङ्गीक्रियते । अतः तेन कृतं काव्यस्वरूपं भाषाशैल्यादिदृष्ट्या साङ्गोपाङ्गं विचारयितुं पण्डितराजजगन्नाथकृतकाव्यस्वरूपसमीक्षा इति शीर्षकोपेतो विषयोऽयं गृहीतो मया।

पण्डितराजजगन्नाथेन विरचितेषु विविधग्रन्थरत्नेषु रसगङ्गाधर इति काव्यशास्त्रीयग्रन्थविशेषः साहित्यशास्त्रीयचिन्तनपरम्परायां सर्वान्तिमः प्रामाणिकश्च ग्रन्थो वर्तते। अस्य ग्रन्थस्य महत्त्वत्रयं प्रामुख्येन वर्तते। यथा-

1. सकलकाव्यशास्त्रीयचिन्तनदर्शनत्वाद् ग्रन्थोऽयं शास्त्रीयचिन्तनपरम्परायाः साक्षीभूतोऽस्ति।
2. पण्डितराजजगन्नाथेनायं ग्रन्थो नव्यन्यायभाषाशैल्या विरचितोऽस्ति।
3. काव्यशास्त्रीयचिन्तनदृष्ट्या अस्मिन् ग्रन्थे पूर्वाचार्येष्ववलोकिता दोषाः निवारितास्तथा काव्यस्य परिष्कृतं लक्षणं निरूपतमस्ति।

काव्यलक्षणस्य व्याख्यानमपि सूक्ष्मचिन्तनेन सह न्यायशैल्या क्रियते। अस्मात् कारणात् काव्यशास्त्रविषयकशंकायाः समाधानं सम्यग् रूपेण परिदृश्यते। काव्ये सहृदयस्य अन्तःकरणमेव प्रमाणं भवति यः अनुभवस्य विषयो वर्तते, यस्य अभिव्यक्तिः सामान्यभाषया सम्यक् रूपेण न भवितुं शक्यते। यदि किञ्चिदप्यभिव्यक्तिः स्यात् तर्हि अभिव्यक्तौ श्लेषः आगच्छति। अभिव्यक्तौ श्लेषस्य निवारणार्थं नव्यन्यायभाषाशैल्याः अनुप्रयोगः अस्मिन् ग्रन्थे आचार्येण कृतः । अस्मात् कारणादयं ग्रन्थोऽयं काव्यशास्त्रस्य उत्कृष्टतमोऽस्ति।

प्रबन्धेऽस्मिन् रसगङ्गाधरे विद्यमानस्य काव्यलक्षणस्य विमर्शनं विधाय काव्यलक्षणविषयकान् सन्देसमूहान् दूरीकर्तुं प्रयासः कृतः। अस्मिन् प्रसङ्गे सर्वप्रथमं काव्यस्य विशेष्यतावच्छेदकं यत् काव्यत्वम् अस्ति, पुनश्च यद् अकाव्यात्काव्यस्य पार्थक्यज्ञानसाधने असाधारणं कारणं वर्तते तदेव प्रथमं पर्यालोचितं ग्रन्थकारेण । अत एव तस्य काव्यस्य सामान्यलक्षणं सर्वप्रथमं पण्डितराजजगन्नाथेन कृतम् यत्- रमणीयार्थप्रतिपादकः शब्दः काव्यम्[1] इति। अतः पण्डितराजस्य मते शब्द एव काव्यपदवाच्यं भवति न तु शब्दार्थयुगलम्। कीदृशः शब्दः काव्यमित्याकाङ्क्षायां रमणीयार्थप्रतिपादकः इति तद्विशेषणमुक्तं काव्यलक्षणघटकरूपेण । पुनश्चकाव्यलक्षणघटकतया व्यवहृतानां विशेष्यविशेषणपदानां विशेषविवेचनं विहितं तल्लक्षणपर्यालोचनप्रसङ्गे।

पण्डितराजकृते काव्यलक्षणेऽस्मिन् धर्मि काव्यं वर्तते। यः शब्दः सहृदयानां हृदये रमणीयार्थस्य प्रतिपादनमथवा उत्पादनं करोति, तस्य ज्ञानं विना काव्यस्य व्यवहारो भवितुं नैव शक्यते। तस्मात् कारणात् रमणीयार्थविषयकप्रतिपत्तिजनकशब्दः ज्ञानविषयः शब्दः वाक्यरूपं वा काव्यमिति बोध्यते। अनया व्याख्यया एवेदं लक्षणम् असम्भवदोषरहितं सम्भवति। अस्मिन् लक्षणे शब्दस्य ग्रहणं चेष्टादिकं निराकरणाय वर्तते । वाच्यादित्रिष्वपि रमणीयताबोधनाय तत्प्रतिपादकपदस्य ग्रहणम् । रमणीयेतिपदस्य साधुत्वान्वाख्यायकव्याकरणशास्त्ररूपे शब्दे अतिप्रसङ्गपरिहारायात्र अर्थस्य ग्रहणम्। धनं गृहाण इति वाक्यस्य काव्यत्ववारणाय रमणीयता इति पदस्य ग्रहणं लक्षणे कृतम्[2]। काव्यत्वसामान्यधर्मः यः समवायसम्बन्धेन काव्ये तिष्ठति। अत्र काव्यमेव लक्ष्यं वर्तते। अत एव लक्ष्ये लक्ष्यता स्वरूपसम्बन्धेन तिष्ठति। लक्ष्यता काव्यस्य आह्लादधर्मः। रमणीयार्थस्य प्रतिपादकः शब्दः काव्यस्य लक्षणं वर्तते, यः काव्यस्य असाधारण धर्मः यः समवाय सम्बन्धेन काव्ये तिष्ठति। काव्यत्वं लक्ष्यताया अवच्छेदकम्। अन्यूनानतिरिक्तधर्मः अवच्छेदकः लक्ष्यतावच्छेदकं समनियतत्वं धर्मत्वम् असाधारणत्वं यः

रमणीयार्थस्य प्रतिपादकः शब्दोऽस्ति अवच्छेदकोपरान्तम् यत्र यत्र काव्यत्वं तत्र तत्र रमणीयार्थप्रतिपादकशब्दत्वम् । यत्र यत्र रमणीयार्थप्रतिपादकशब्दत्वम् तत्र तत्र काव्यत्वम् इति न्यायात् इदं लक्षणं त्रिदोषरहितम्।

काव्यलक्षणे रमणीयता पदस्य प्रयोगः कृतः । रमणीयता तु भिन्न भिन्नरूच्यनुसारं भिन्नं भिन्नं भवितुं शक्यते । अतएव तस्याः स्वरूपमपि निरूपितम्-

रमणीयता च लोकत्तराह्लादजनकज्ञान गोचरता [3] इति ।

लोकत्तरं नाम अलौकिकः यः आह्लादः परमानन्दः इत्यर्थः, तस्य आलौकिकानन्दस्य जनकं नाम उत्पादकं यत् ज्ञानं तदर्थज्ञानं, तादृशार्थस्य गोचरता, अर्थात् तस्य ज्ञानस्य विषयः यः अर्थः तस्मिन्नेवार्थे रमणीयता तिष्ठति । लोकोत्तराह्लादस्य उत्पादकम् ज्ञानं वर्तते । अनयोः लोकोत्तरानन्दज्ञानयोः मध्ये जन्य-जनकभावस्सम्बन्धो वर्तते। ज्ञानस्य विषयः रमणीयार्थो भवति । अत एव ज्ञानं विषयी रमणीयार्थः तस्य विषयो भवति । अनयोः मध्ये विषय-विषयीभावसम्बन्धो वर्तते । अत्र रमणीयः अर्थस्य विशेषणम्, यः ज्ञानस्य विषयो भवति । स्वरूपसम्बन्धेन विषयता अपि विषये वर्तते। विषयता अत्र रमणीयनिष्ठा रमणीयता एव यस्य निरूपकः ज्ञानमेवाङ्गीक्रियते । अत एव ज्ञानस्य गोचरता विषयता वा रमणीयता भवति । नव्यन्यायभाषायां निरूपणं एवं भवति यत् लोकोत्तरस्यालौकिकस्य आह्लादस्यानन्दस्य जनकमुत्पादकं यज्ज्ञानं तद्गोचरता तन्निरूपिता विषयता रूपाऽर्थनिष्ठा रमणीयतेत्यर्थः । यद्यपि आह्लादनिष्ठं लोकोत्तरत्तम् सातिशयं अपि भवितुं शक्यते । सातिशये लोकत्तरत्वे बहुविधानामानन्दानां संग्रहणं भवितुं शक्यते । निरतिशये लोकत्तरत्वे तु ब्रह्मानन्दे भवति । साहित्यविषयकं लोकोत्तरत्वं अनयोः भिन्नमस्ति । अस्मिन् लोकोत्तरत्वस्य विषये अनुभवो यः मानसप्रत्यक्षरूपः स एव साक्षीः । अनयोः अनुभवः काव्ये भावना भवति । भावना एव ज्ञानं भवति काव्यशास्त्रे। तर्हि भावनायाः स्वरूपं अपि उक्तम् इयं भावना लोकोत्तरचमत्कारस्य जनिका कारण रूपेण प्रतिष्ठापितवान्

कारणञ्च तदवच्छिन्ने भावनाविशेषः पुनः पुनरनुसन्धानात्मा[4] इति।

भावना लोकोत्तरचमत्कारस्य कारणं वर्तते । लोकोत्तरचमत्कारोऽत्र कार्यम् । अनयोः मध्ये कार्य-कारणभावसम्बन्धो वर्तते । लोकोत्तरचमत्कारत्वं हि लोकोत्तरचमत्कारे समवाय सम्बन्धेन तिष्ठति । तदेव लोकोत्तरचमत्कारनिष्ठकार्यतायाः अवच्छेदकं तत्त्वम् । कार्यता लोकोत्तरचमत्कारे स्वरूपसम्बन्धेन तिष्ठति । कार्यता निरूपितकारणतावान् भावनाविशेषः । स च पुनः पुनः अनुसन्धानस्वभावः, यतो हि काव्यशरीरे भूयो भूयो अनुसन्धाने स्मरणात्मकं वा लोकोत्तरानन्दो जायते ।

भावनया लोकोत्तराह्लादस्योत्पत्तिः भवति । आह्लादे अनुभवसाक्षिकमेव प्रमाणं वर्तते । अस्य प्रयोजनं पुत्रोत्पत्तिजन्याह्लादः धनप्राप्तिविषयकाह्लादो वा न स्याद्, अर्थात् तस्मिन् प्रसङ्गे आह्लादस्य प्रसक्तिः भवेत् । अस्मात् कारणात् लोकोत्तरत्वपदस्य अभिनिवेशः येन रूपेण काव्यस्य सामान्यलक्षणस्य मीमासा पण्डितराजजगन्नाथेन कृता । सामान्यलक्षणस्यप्रतिपादने सन्देहनिवृत्तये नव्यन्यायशैल्यां काव्यस्य परिष्कृतं लक्षणत्रयं दत्तम् । प्रथमं लक्षणं यथा-

चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम्[5] इति ।

अस्मिन् लक्षणे शब्दः यः विशेष्यः सः एव काव्यम्, परन्तु विशेषणरूपेण लोकोत्तराह्लादस्य जनकः यः भावनाविशेषः, तस्य विषयः यः अर्थः, सः विशेषणरूपेण अभिधेयः । अस्य विशेषणस्य प्रतिपादकः शब्दत्वनिष्ठः शब्दः एव काव्यम् इति ज्ञेयम् ।

लक्षणेऽस्मिन् शब्दविशेष्यः एव काव्यम्, यस्य उत्पत्तिः चमत्कारेण सम्भवति । अर्थात् चमत्कारस्य जनकः यः भावनाविशेषः तस्य विषयः अर्थः वर्तते । तस्य प्रतिपादकत्वे सति शब्दत्वं काव्यत्वं इति फलितम् । चमत्कारजन्या भावना च तस्य जनिका । अनयोः मध्ये जन्य-जनक भावसम्बन्धो वर्तते । भावनायाः विषयः अर्थः । अनयोः मध्ये विषय-विषयीभावसम्बन्धो वर्तते । अर्थस्य प्रतिपादकः शब्दोऽस्ति । अनयोः मध्ये प्रतिपाद्य-प्रतिपादकभावः सम्बन्धो वर्तते । अस्मिन् पदे भावनाविशेषं रूपत्वं स्वविकारस्य प्रयोजनमस्ति, यत् प्रकृतः अर्थः भासते यस्य ज्ञानेन चमत्कारः नोत्पद्यते । अत एव प्रकृतार्थप्रतिपादके शब्देऽपि काव्यत्वं स्यात्तद्वारणाय ज्ञानं भावनाविशेषरूपत्वेन गृह्यते । यतो हि भावना पुनः पुनरनुसन्धानरूपा अर्थात् धारया प्रवाहमानज्ञानमेव । तथा धार्य जायमाने ज्ञाने चमत्कारजनकाः केचित्पदार्थाः भासन्ते । तदैव तत् प्रतिपादका शब्दाः अपि अत एव धारावाहिकसकलशाब्दवुद्धिविषये चमत्कारजनकताऽवच्छेदकार्थप्रतिपादिकार्थे लक्षणे प्रसक्तिः अस्ति । तस्मात् द्वितीये लक्षणे तस्य निवेशनं कृतम्, यथा-

यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकताऽवच्छेदकं तत्त्वम् ।[6]

अस्मिन् लक्षणे शब्देन प्रतिपादितोऽर्थः विषयः, भावना तु विषयी । भावनानिष्ठं भावनात्वं जातिः, तद्भावनात्वम् एव भावनानिष्ठचमत्कारजनकतायाः अवच्छेदकम् इति ।

प्रकृते द्वितीयलक्षणे यत् पदस्य अर्थः शब्दः यः अर्थस्य प्रतिपादकः । अनयोः मध्ये प्रतिपाद्य-प्रतिपादकभावसम्बन्धो वर्तते । यदि अर्थः भावनायाः विषयोऽस्ति, तर्हि अर्थ-विषययोर्मध्येऽपि विषय-विषयीभावसम्बन्धो वर्तते । अत्र भावना चमत्कारस्य जनिका अस्ति । भावना विशिष्टज्ञानरूपा अस्ति । भावनायाः धर्मः चमत्कारजनकता यः भावनायाः स्वरूपसम्बन्धेन तिष्ठति । भावनायाः एकः सामान्यधर्मो वर्तते । स तु समवायसम्बन्धेन भावनायां तिष्ठति । भावनात्वं चमत्कारजनकतयाः अवच्छेदकं तत्त्वम् । अवच्छेदकोपरान्तम् अयं नियमो भवति यत् यत्र यत्र भावनात्वं तत्र तत्र चमत्कारजनकतावच्छेदकत्वम् । यत्र यत्र चमत्कारजनकतावच्छेदकत्वं तत्र तत्र भावनात्वम् । अनेन प्रकारेण भावनात्वं चमत्कारजनकत्वं । अनयोः मध्ये समनियतत्वं वर्तते । अस्मिन् लक्षणे भावनाविषयकपूर्ववर्ती लक्षणस्य दोषः अपाकृतः, परन्तु यत् तत् पदयोः इदं लक्षणं अतिव्याप्तिदोषेण दुष्टम् । यतो हि अनेन लक्षणेन अयं परिस्कारः अस्ति भावनात्वम् एव काव्यत्वम् । भावनात्वं चमत्कारजनकतायाः अवच्छेदकत्वं तत्त्वम् । अस्मात् कारणात् भावनात्वं विना चमत्कारस्य नोत्पत्तिः । काव्यस्य मूलं भवति भावनात्वम् । अत एव भावनात्वम् एव काव्यत्वं भवति ।

द्वितीयलक्षणनिष्ठदोषनिवारणार्थं पण्डितराजेन तृतीयं लक्षणं आविस्कृतम् । तल्लक्षणं भवति-

स्वविशिष्टजनकताऽवच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्वमेव वा काव्यत्वमिति फलितम्।[7] इति। अस्मिन् लक्षणे चमत्कारजनकतावच्छेदकमित्यस्य चमत्कारनिष्ठजन्यतानिरूपितार्थविषयकभावनानिष्ठजनकतायाः अवच्छेदकमिति[8] । तृतीये लक्षणे व्यवहृतस्य स्व पदस्य तात्पर्यं चमत्कारत्वम् । तेन विशिष्टः चमत्कारः, यस्य जनकः भावनाविशेषः । भावनाविशेषस्य अर्थ एव विषयितासम्बन्धेन भावनानिष्ठचमत्कारजनकतायाः अवच्छेदकः । तादृशार्थस्य प्रतिपादकः शब्दविशेषः । अत एव शब्दार्थयोः मध्ये प्रतिपाद्य-प्रतिपादकसम्बन्धो वर्तते । प्रतिपादकता शब्दे स्वरूपसम्बन्धेन तिष्ठति । प्रतिपादकता सम्बन्धेन एव चमत्कारत्वं शब्देन सह सम्बन्धितम् । अत एव चमत्कारत्वमेव काव्यत्वं भवति । अतः प्रामाणिकरूपेण तस्य काव्यस्य सफलस्वरूपं निरूप्यते रसगङ्गाधरकारेण यत् स्वविशिष्टजनकताऽवच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्वमेव वा काव्यत्वमिति फलितम् इति ।

तृतीयलक्षणानुसारेण चमत्कारत्वम् समवायसम्बन्धेन चमत्कारे तिष्ठति । चमत्कारः भावनायाः जनकः । अत एव भावना चमत्कारस्य जनिका भवति । भावना-चमत्कारजनकयोः मध्ये जन्य-जनकभावसम्बन्धो वर्तते । भावनायाः विषयार्थः विषयितासम्बन्धे चमत्कारजनकतायाः अवच्छेदको भवति । अर्थस्य प्रतिपादकः शब्दः । शब्दे स्वरूपसम्बन्धेन प्रतिपादकता तिष्ठति । प्रतिपादकता सम्बन्धेन चमत्कारत्वमपि शब्दे तिष्ठति चमत्कारस्य आधारकारणत्वात् । अस्मात् कारणात् चमत्कारत्वमेव काव्यत्वम् । चमत्कारनिष्ठजन्यतानिरूपितभावनानिष्ठजनकतावच्छेदकार्थप्रतिपादकशब्दत्वं काव्यत्वमिति इति ज्ञेयं लक्षणम्[9] । अनेन प्रकारेण काव्यत्वलक्षणप्रसङ्गे पण्डितराजजगन्नाथेन नव्यन्यायशैल्या काव्यस्य परिष्कृतं लक्षणं विलिख्य उपसंहृतम् ।

प्रथमे लक्षणे सामान्यलक्षणस्य शब्दः एव विशेष्यरूपेण प्रदत्तोऽस्ति । विशिष्टरूपेण शब्दः एव लोकोत्तराह्लादस्य आधारत्वात् काव्यपदभाग्भवति । द्वितीये लक्षणे लोकोत्तराह्लादस्य कारणं भावनाविशेषः एव । काव्यलक्षणस्य कारणं भावनाविशेषः एव काव्यलक्षणस्य कृते विशेष्यः । तृतीये लक्षणे काव्यस्य प्रयोजनं लोकोत्तरचमत्कारः । तदेव काव्यलक्षणस्य विशेष्यभूतम्। अत एव लोकोत्तरचमत्कारः एव काव्यस्य सर्वोत्तमं लक्षणं तेन स्पष्टीकृतम् ।

**सन्दर्भाः-**


1. **रसगङ्गाधरः, प्रथमाननम्, पृ.** – 10.
2. **रसगङ्गाधरः, मधुसूदनी-विवृतिःटीका, पृ-9.**
3. **रसगङ्गाधरः, प्रथमाननम्,पृ.**– 11.
4. **रसगङ्गाधरः, प्रथमाननम्, पृ.**– 12.
5. **रसगङ्गाधरः, प्रथमाननम्, पृ.-** 13.
6. **रसगङ्गाधरः, प्रथमाननम्, पृ.** – 14.
7. **रसगङ्गाधरः, प्रथमाननम्, पृ.** – 14.
8. **रसगङ्गाधरः, प्रथमाननम्, रसतरङ्गिणीटीका, पृ. – 10.**
9. **रसगङ्गाधरः, प्रथमाननम्, रसतरङ्गिणीटीका, पृ.-11**